संस्कृतवार्ता:

दिनाङ्क: 14.01.2026 प्रात: - 06:55

<u>सेनाप्रमुख:/शक्सगामोपत्यका</u>

सेनाप्रमुखेण जनरल्-उपेन्द्र-द्विवेदिना जम्मू-कश्मीरस्य शक्सगामोपत्यका-विषयिणी चीन-पाकिस्तानयोः त्रिषष्ट्यधिकोन-विंशति-तमाब्दीया सहमतिः विधिविरुद्धा घोषिता। चीनदेशीय-विदेशमन्त्रालयस्य प्रवक्तुः शक्सगामोपत्यका-विषयिणीं टिप्पणीम् अभिलक्ष्य सः एवम् अवदत्। जनरल्-द्विवेदी उक्तवान् यत् भारतम् उपत्यकायां कीदृग्विधाय अपि क्रियाकलापाय स्वीकृतिं न ददाति।

श्रीद्विवेदी उक्तवान् यत् चीनदेशेन सह वास्तविक-नियन्त्रण-रेखायां स्थितिः सुस्थिरा अस्ति, परन्तु सततं समवधानता आवश्यकी अस्ति।

सः पुनः अवदत् यत् सिन्दूराभियानं सेनात्रयस्य समन्वयस्य श्रेष्ठम् उदाहरणम् अस्ति। अपि च, एतत् अभियानम् अद्यापि प्रवर्त्यते। श्रीमता द्विवेदिना उक्तं यत् शत्रूणां कीदृग्विधस्य अपि दुस्साहसस्य प्रभावि प्रत्युत्तरं प्रदास्यते।

==============================

<u>भारत-फ्रांस-संवाद:</u>

फ्रांस-राष्ट्रपतेः इमैनुएल-मैक्रों-इत्यस्य रणनीतिक-परामर्शदः इमैनुएल-बोनः ह्यः नवदिल्ल्यां प्रधानमन्त्रिणं नरेन्द्रमोदिनम् अमिलत्। वैश्विक-सुरक्षा-परिदृश्ये आह्वानानि सम्मुखीकर्तुं, शान्तिं स्थिरतां च प्रवर्धयितुं भारत-फ्रांस-देशाभ्यां घनिष्ठ-सहयोगस्य महत्त्वं सबलं प्रतिपादितम्। नवदिल्ल्यां ह्यः राष्ट्रिय-सुरक्षा-परामर्शदः अजीत-डोभालः फ्रांस-राष्ट्रपतेः रणनीतिक-परामर्शदः इमैनुएल-बोनः च अष्टात्रिंशत्तमस्य भारत-फ्रांस-रणनीतिक-संवादस्य सहाध्यक्षताम् अकुरुताम्। संवाद-काले उभाभ्यां पक्षाभ्यां रणनीतिक-सहभागितां प्रति स्व-स्व-प्रतिबद्धता पुनः उदीरिता। उभौ अपि देशौ रक्षा-सुरक्षान्तरिक्षासैन्य-परमाणुसहयोग-प्राविधिकी-क्षेत्रेषु अनुवर्तमानानां द्विपक्षीय-पदक्षेपाणां विषये चर्चां कृतवन्तौ।

अपि च, 'मेक् इन् इण्डिया'-इत्यस्य 'आत्मनिर्भर-भारतस्य' च भावनया प्रेरितानां संयुक्तविकासस्य सहयोगस्य च अवसराणां विषये अपि चर्चा अभवत्। एतद् अतिरिच्य, परिवर्तित-भू-राजनीतिक-स्थितिं, समानतया चिन्ताजनकान् क्षेत्रीयान् अन्ताराष्ट्रियान् च विषयान् अभिलक्ष्य विचारणा जाता।

=================================

<u>मकरसंक्रान्तिः</u>

अद्य मकरसंक्रान्तिः वर्तते। अयं उत्सवः नवशस्यानां हर्षेण सूर्यस्य उत्तरायणेन च सह सम्बद्धः अस्ति। पर्व एतत् देशस्य विभिन्नेषु भागेषु पोङ्गल-उत्तरायण-भोगालीबिहू-नामभिः सोत्साहम् आमान्यन्ते।

=================================

<u>सी.एस्.पी.ओ.सी.-सम्मेलनम्</u>

सी.एस्.पी.ओ.सी.-इति राष्ट्रमण्डल-देशानां राष्ट्रिय-संसदाम् अध्यक्षाणां पीठासीनाधिकारिणां च अष्टाविंशतितमं सम्मेलनम् अद्यप्रभृति नवदिल्ल्याम् आरभते। भारतस्य आतिथ्ये त्रिदिवसीयम् एतत् सम्मेलनं जनवरीमासस्य षोडश-दिनाङ्क-पर्यन्तं प्रवर्तिष्यते। लोकसभायाः अध्यक्षः ओम्-बिरला एतस्य सम्मेलनस्य अध्यक्षतां करिष्यति। तत्रान्तरे, नवदिल्ल्यां श्रीबिरला वार्ताहरान् असूचयत् यत् प्रधानमन्त्री नरेन्द्रमोदी जनवरी-मासस्य पञ्चदशे दिनाङ्के संविधान-सदनस्य ऐतिहासिके 'सेंट्रल् हॉल्'-सभागारे सम्मेलनस्य उद्घाटनं करिष्यति।

=================================

<u>क्रिकेट्</u>

'वुमन्स्–प्रीमियर्–लीग्–क्रिकेट्'-स्पर्धा-मालिकायां गतरात्रौ नवी-मुम्बय्यां डॉ.डी.वाई.पाटिल-स्पोर्ट्स्-एकेडमी-क्रीडाङ्गणे मुम्बई-इण्डियन्स्-दलेन गुजरात-जायंट्स्-दलं सप्तभिः क्रीडकैः पराजितम्।

त्रिनवत्यधिक-शत-धावनाङ्कानां विजय-लक्ष्यम् अनुसरता मुम्बई-इण्डियन्स्-दलेन क्रीडकत्रयस्य हानि-पुरस्सरम् अन्तिमे क्षेपचक्रे विजयः अधिगतः।

।।इति वार्ताः।।